# श्रीमद् भागवत रसिक कुटुंब

## तुलसी महिमा

तव केशसमूहाश्च, पुण्यवृक्षा भवन्त्विति ।
तुलसीकेशसम्भूतास्- तुलसीति च विश्रुताः ॥ 1॥

त्रिषु लोकेषु पुष्पाणां, पत्राणां(न्) देवपूजने ।
प्रधानरूपा तुलसी, भविष्यति वरानने ॥ 2॥

स्वर्गे मर्त्ये च पाताले, वैकुण्ठे मम सन्निधौ ।
भवन्तु तुलसीवृक्षा, वराः(फ्) पुष्पेषु सुन्दरि ॥3॥

गोलोके विरजातीरे, रासे वृन्दावने भुवि ।
भाण्डीरे चम्पकवने, रम्ये चन्दनकानने ॥ 4॥

माधवीकेतकीकुन्द-मल्लिकामालतीवने ।
भवन्तु तरवस्तत्र, पुण्यस्थानेषु पुण्यदाः ॥ 5 ॥

तुलसीतरुमूले च, पुण्यदेशे सुपुण्यदे ।
अधिष्ठानं(न्) तु तीर्थानां, सर्वेषां(ञ्) च भविष्यति ॥ 6॥

**तत्रैव सर्वदेवानां, समधिष्ठानमेव च ।**
**तुलसीपत्रपतन- प्राप्तये च वरानने ॥ 7 ॥**

**स स्नातः(स्) सर्वतीर्थेषु, सर्वयज्ञेषु दीक्षितः ।**
**तुलसीपत्रतोयेन, योऽभिषेकं समाचरेत् ॥8 ॥**

**सुधाघटसहस्रेण, सा तुष्टिर्न भवेद्धरेः ।**
**या च तुष्टिर्भवेन्नृणां(न्), तुलसीपत्रदानतः ॥ 9॥**

**गवामयुतदानेन, यत्फलं(ल्ँ) लभते नरः ।**
**तुलसीपत्रदानेन, तत्फलं(ल्ँ) लभते सति ॥ 10॥**

**तुलसीपत्रतोयं(ञ्) च, मृत्युकाले च यो लभेत् ।**
**मुच्यते सर्वपापेभ्यो, विष्णुलोकं स गच्छति ॥11 ॥**

**नित्यं(यँ) यस्तुलसीतोयं, भुङ्क्ते भक्त्या च मानवः ।**
**स एव जीवन्मुक्तश्च, गंगास्नानफलं(ल्ँ) लभेत् ॥ 12॥**

**नित्यं(यँ) यस्तुलसीं(न्) दत्त्वा, पूजयेन्मां(ञ्) च मानवः ।**
**लक्षाश्वमेधजं पुण्यं(ल्ँ), लभते नात्र संशयः ॥ 13 ॥**

**तुलसीं स्वकरे कृत्वा, देहे धृत्वा च मानवः ।**
**प्राणांस्त्यजति तीर्थेषु, विष्णुलोकं स गच्छति ॥ 14॥**

**तुलसीकाष्ठनिर्माण-मालां(ङ्) गृह्णाति यो नरः ।**
**पदे पदेऽश्वमेधस्य, लभते निश्चितं फलम् ॥15 ॥**

**तुलसीं स्वकरे धृत्वा, स्वीकारं(यँ) यो न रक्षति ।**
**स याति कालसूत्रं(ञ्) च, यावच्चन्द्रदिवाकरौ ॥16 ॥**

**करोति मिथ्या शपथं(न्), तुलस्या यो हि मानवः ।**
**स याति कुम्भीपाकं(ञ्) च, यावदिन्द्राश्चतुर्दश ॥17 ॥**

**तुलसीतोयकणिकां, मृत्युकाले च यो लभेत् ।**
**रत्नयानं समारुह्य, वैकुण्ठं स प्रयाति च ॥ 18॥**

**पूर्णिमायाममायां(ञ्) च, द्वादश्यां रविसंक्रमे ।**
**तैलाभ्यंगे चास्नाते च, मध्याह्ने निशि सन्ध्ययोः ॥ 19॥**

**अशौचेऽशुचिकाले वा, रात्रिवासोऽन्विता नराः ।**
**तुलसीं(यँ) ये विचिन्वन्ति, ते छिन्दन्ति हरेः(श्) शिरः ॥ 20॥**

**त्रिरात्रं(न्) तुलसीपत्रं, शुद्धं पर्युषितं सति ।**
**श्राद्धे व्रते च दाने च, प्रतिष्ठायां सुरार्चने ॥21॥**

**भूगतं(न्) तोयपतितं(यँ), यद्दत्तं(वँ) विष्णवे सति ।**
**शुद्धं(ञ्) च तुलसीपत्रं(ङ्), क्षालनादन्यकर्मणि ॥ 22॥**
**॥इति श्रीतुलसीमहिमा संपूर्णा ॥**